THE STEPPING-STONE
TO
THE STUDY OF SANSKRIT.

BY

MATHURANATH MANDAL, M.A.,

Holder of the First Grade English Teachership Certificate, No. 294, of the Education Department, Bengal; Harakumar Tagore Sanskrit Graduate Scholar of the Government Sanskrit College, Calcutta, for the session 1899-1900; Senior Professor of Sanskrit Literature, L. M. S. College, Bhawanipur, Calcutta.

सुवन्ति गुर्व्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः।
ति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्व्वमनोरमा गिरः॥" भारविः

UBLISHED BY THE AUTHOR, 207, GRAND TRUNK ROAD
SALKIA P. O., HOWRAH (INDIA).

June 1906.

All Rights Reserved.

Digitized by Google

131

HARVARD
UNIVERSITY
LIBRARY

PRINTED BY B. K. DAS AT THE WELLINGTON PRINTING
WORKS, 10 HALADHAR BURDHAN'S LANE, CALCUTTA.

Digitized by Google

PREFACE.

देवशब्दाम्बुधिं ये हि गन्तुमिच्छन्ति बालकाः।
तेषां भवत्वयं ग्रन्थः सदैव मार्गदर्शकः॥

In compiling the following lessons for the Fourth and Third Classes of High English Schools, I have proceeded on the principle that students should know the main fundamental rules of the Sanskrit Grammar and need not trouble about the number of pages to be finished in the two academic years. I venture to hope that, if this principle of teaching Sanskrit be adhered to, students will learn the idiom of the language, and their minds will be fully prepared for the study of the Sanskrit Entrance Course in the next two years. Moreover, having once grasped the fundamental rules, all they then read will prove of real value in exercising their intelligence, and their curiosity may be awakened, during the plastic years of youth, for the study of the most ancient and sacred language of their motherland.

ADVICE TO THE STUDENT.

The student should carefully read, along with this book, chapters on सन्धि, शब्दरूप, and धातुरूप from a Sanskrit Grammar and consult a Sanskrit-English Dictionary as often as necessity may arise. He should also use a


Digitized by Google

fresh note-book to take down what his teacher may dictate in the class-room. The grammatical rules at the beginning of each lesson may be omitted at the first reading. Lesson 43 must be learnt as soon as he is acquainted with the देवनागर characters. He must learn to read and spell correctly and, when sufficiently advanced, he should note all grammatical rules that each word of a sentence may serve to illustrate.

NOTICE.

1. Any correction or suggestion for improvement of the work will be most thankfully received.

2. No copy of this book will be considered genuine unless it be issued by the author under his own seal and signature.



Digitized by Google

THE STEPPING-STONE
TO
THE STUDY OF SANSKRIT.

THE SANSKRIT ALPHABET.

अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ,
ए, ऐ, ओ, औ।

क, ख, ग, घ, ङ; च, छ, ज, झ, ञ;
ट, ठ, ड, ढ, ण; त, थ, द, ध, न;
प, फ, ब, भ, म; य, र, ल, व; श,
ष, स, ह। ं, ः, ँ।

N.B.—क, ख &c., in the above list, have the vowel अ attached to them for the sake of pronunciation; for, no consonant can be sounded without the help of a vowel (क = क् + अ)।

Observe that—

क् + अ = क	क् + आ = का	क् + इ = कि	क् + ई = की
क् + उ = कु	क् + ऊ = कू	क् + ऋ = कृ	क् + ॠ = कॄ
क् + ऌ = कॢ	क् + ए = के	क् + ऐ = कै	क् + ओ = को
क् + औ = कौ	क् + ं = कं	क् + ः = कः	क + ँ = कँ
क् + त = क्त	क् + न = क्न	क् + म = क्म	क् + य = क्य
क् + र = क्र	क् + ल = क्ल	क् + व = क्व	क् + ष = क्ष
ख् + य = ख्य	ख् + र = ख्र	ख् + व = ख्व	ग् + द = ग्द
ग + ध = ग्ध	ग् + न = ग्न	ग् + भ = ग्भ	ग् + म = ग्म

Digitized by Google

ग्+य=ग्य	ग्+र=ग्र	ग्+ल=ग्ल	ग्+व=ग्व
घ्+न=घ्न	घ्+य=घ्य	घ्+र=घ्र	ङ्+क=ङ्क
ङ्+ख=ङ्ख	ङ्+ग=ङ्ग	च+छ=च्छ	च्+र=च्र
च्+ल=च्ल	च्+व=च्व	ज्+ञ=ज्ञ	ज्+र=ज्र
ञ्+व=ञ्व	ञ्+च=ञ्च	ञ+छ=ञ्छ	ञ्+झ=ञ्झ
ट्+ट=ट्ट	ट्+ठ=ट्ठ	ट्+य=ट्य	ट्+र=ट्र
ण्+ट=ण्ट	ण्+ठ=ण्ठ	ण+ड=ण्ड	त्+त=त्त
त्+थ=त्थ	त्+न=त्न	त्+प=त्प	त्+य=त्य
त्+र=त्र	त्+ल=त्ल	त्+व=त्व	थ्+य=थ्य
थ्+र=थ्र	थ्+व=थ्व	द्+द=द्द	द्+ध=द्ध
द्+न=द्न	द्+व=द्व	द्+भ=द्भ	द्+म=द्म
द्+य=द्य	द्+र=द्र	ध्+न=ध्न	ध्+म=ध्म
ध्+य=ध्य	ध+र=ध्र	ध+व=ध्व	न्+त=न्त
न्+थ=न्थ	न्+द=न्द	न्+ध=न्ध	न्+न=न्न
न्+म=न्म	न्+य=न्य	न्+र=न्र	प्+त=प्त
प्+न=प्न	प्+य=प्य	प्+र=प्र	फ्+य=फ्य
फ्+र=फ्र	फ्+ल=फ्ल	व्+ब=व्ब	व्+द=व्द
ब्+ध=ब्ध	ब्+य=ब्य	ब्+र=ब्र	ब्+ल=ब्ल
भ्+य=भ्य	भ्+र=भ्र	म्+न=म्न	म्+प=म्प
म्+भ=म्भ	म्+म=म्म	य्+य=य्य	य्+र=य्र
य्+व=य्व	र्+क=र्क	र्+ग=र्ग	ल्+क=ल्क
ल्+ग=ल्ग	ल्+ल=ल्ल	श्+च=श्च	श्+व=श्व
श्+न=श्न	श्+म=श्म	श्+य=श्य	ष्+ट=ष्ट
ष्+ठ=ष्ठ	ष्+ण=ष्ण	ष्+य+य=ष्य	ष्+र=ष्र
ष्+व=ष्व	स्+त=स्त	स्+थ=स्थ	स्+न=स्न
स्+व=स्व	स्+म=स्म	स्+य=स्य	स्+र=स्र
ह्+न=ह्न	ह्+ण=ह्ण	ह्+म=ह्म	ह्+य=ह्य
ह्+र=ह्र।			

Digitized by Google

Lesson 1.

1. Adjectives agree with the nouns, they qualify, in number, gender, and case-ending suffixes.

सुगमोमार्गः । दीर्घौबाहू । पूर्णःकुम्भाः ।
सुरभिः पवनः । फलितौ रसालौ । हृष्टा मृगाः ।
कान्तश्चन्द्रः । विचित्रौ पक्षिणौ । पुष्पितास्तरवः ।
मानुषी वाक् । चञ्चले दृष्टी । शुभा वार्त्ताः ।
वासन्ती लता । वेगवत्यौ नद्यौ । विकीर्णाः शाखाः ।
पुण्या सरित् । ते रजन्यौ । मधुरा गिरः ।
नवं पत्रम् । मदीये पुस्तके । दुश्चराणि तपांसि ।
नीलं नभः । विशाले लोचने । स्वादूनि पयांसि ।
विकचं कमलम् । रसवती फले । निविड़ानि वनानि ।

Lesson 2.

2. In the कर्तृवाच्य (Active Voice), the verb agrees with its nominative in number and person (as well as in gender, when the verb ends in a कृत् suffix, as distinguished from a तिङ् suffix).

रविरुदेति । हंसौ क्रीड़तः । गावश्चरन्ति ।
छात्र आगच्छति । कपोतौ उत्पततः । शिशवः हसन्ति ।
रामः पठति । भ्रमरौ गुञ्जतः । अपयान्ति तमांसि ।

Digitized by Google

अमुं देवदत्तं पश्यसि ? आवां व्याकरणं पठावः
कुत आगतोऽसि ? युवां क्व गच्छथः ?
किं जहासि माम् ? यूयं किं कुरुथ ?

वयं गुरोरान्नां शृणुमः । धार्मिकः अनन्तं सुखमश्नुते ।
किन्ते प्रियं करोमि ? एकोऽनुभुङ्क्ते सुकृतम् ।
पुष्पैर्देवानर्चयामि । किं मां न प्रतिभाषसे ?

शुभकृत् शुभमाप्नोति । सुष्ठु शोभसे मुकुटेन ।
वीरं भजते लक्ष्मीः । अनुष्ठितो गुरुनियोगः ।

सम्प्रति वयं प्रतिनिवर्त्तामहे ।

गुरून् वन्दे । मेघाज्जायते वृष्टिः । वायुमाश्रित्य सर्व्वजन्तवः वर्त्तन्ते । अद्य सुप्रभाता निशा मम । क्व प्रस्थितोऽसि । परिणतमहः । सीता राममनुगता । तृष्णैका तरुणायते । ब्रूहि वक्तव्यमवशिष्टोऽस्ति ।

LESSON 3.

3. In the कर्मवाच्य (Passive Voice), the verb agrees with its object in number and person (as well as in gender, when the verb ends in a कृत् suffix, as distinguished from a तिङ् suffix).

Digitized by Google

रत्नं सृज्यते। पुत्रः काम्यते। ऋषेराश्रमो दृश्यते। कुलं शीलेन रक्ष्यते। विद्या आद्रियते बुधैः। भूढ़ाः प्रमादैरभिभूयन्ते। सतां प्रवृत्तिर्धर्मार्थ-युक्ता लक्ष्यते। पुष्पाणि कुत्र नीयन्ते? दरिद्राय अन्नं दीयते। दृष्टा मया रत्नावली। तेन शास्त्र-मधीतम्। मान्यः सुजनः स हि श्रूयते।

Lesson 4.

4. In the भाव-वाच्य, the verb is third person singular (and neuter, when it ends in a कृत् suffix).

तेन सुप्यते। इह आस्यताम्। मया गृहे एव स्थितम्। किमिति अतिवाष्पायितं भवता। गुरु-जनस्त्वामाह्वयति तदागम्यताम्। हिमवन्तमतिक्रम्य यातव्यम्। अहो जितं स्नेहेन। श्रोत्रियजने प्रश्रयेण वर्त्तितव्यम्।

Lesson 5.

5. लट् is used in the Present Tense; लिट्, लङ् and लुङ्, in the Past Tense.

बभूव राजा किल कार्त्तवीर्य्यः। स पृथिवीं शशास। ईजे स विविधैर्यज्ञैः। पितॄंस्तर्पयामास।

Digitized by Google

गन्धर्व्वा देवदेवस्य पुरस्ताद् गीतानि जगुः। देवाः स्तुतिभिर्विष्णुं तुष्टुवुः। ऋष्यशृङ्गः शान्तामुपयेमे। ते कुशीलवौ प्रशशंसुः। तस्य मूर्द्धा पितुश्चरणौ ववन्दे। स दक्षिणामाशां प्रतस्थे।

आसीद्राजा दशरथोनाम। तस्य चत्वारः पुत्रा अभवन्। तौ ऋषीणां पुरस्तादिदं काव्यमगायताम्। स त्रिरात्रं तत्रावसत्। तमागतं दृष्ट्वा पौराः पुरमशोभयन्। सर्व्वे ते प्राहसंस्तदा। सुप्तः स पक्षिणां कोलाहलेनाबुध्यत। कुमारौ विश्वामित्रमवन्देताम्।

रामः रावणमबधीत्। सौमित्रिर्राममन्वगात्। मा शुचः कौन्तेय। मा भैष्टमायुष्मन्तौ। स वेदमध्यैष्ट। मा भूद्दुःखम्। एवमुक्तोऽहं किं कथयामीति नाभ्राषिषम्।

Lesson 6.

6. लोट् denotes command, request, recommendation, wish &c.

त्यज दुर्ज्जनसंसर्गम्। भज साधुसमागमम्। कुरु पुण्यमहोरात्रम्। स्मर नित्यमनित्यताम्।

Digitized by Google

दानधर्मञ्चरतु भवान्। अनुशास्तु मां गुरुजनः। शरणं भव मे दुर्गे। रामस्य चरितं निबोधत। शिवास्ते सन्तु पन्थानः। सर्व्वेषां भद्रमस्तु वः। देवा रक्षन्तु त्वां समरे। सुखी भव चिरं जीव सर्व्वत्र विजयस्व च। पूरयतु कौतूहलं वत्सः। ददतु तरवः पुष्पैरर्घ्यम्। प्रसीदतु देवः। आरोहतु भवान् नावम्। शृणुत मे वचनम्। भयं त्यजत। शिष्यस्तेऽहं, साधि माम्।

शुश्रूषस्व गुरून्। अधीष्व नीतिशास्त्रम्। पूतं भजस्व पन्थानम्। सखे त्रायस्व मां विपन्नम्। सुखाभिः भ्रातृभावेन भुज्यतां पृथिवी। विजयतां महाराजः। उपतिष्ठस्व भगवन्तमादित्यम्। इदानीमेव शत्रुविजयाय प्रतिष्ठतां भवान्।

श्रूयतां सुहृद्वचनम्। पठ्यतां सारभूतं सुभाषितम्। गाथा काचित् प्रगीयताम्। तुरगः विमुच्यताम्। आह्वयतां यज्ञदत्तः। प्रवेश्यतामष्टावक्रः। क्रियतामासनपरिग्रहः। दीयतामस्मै सुवर्णसहस्रम्।

LESSON 7.

7. विधिलिङ् denotes injunction and possibility, आशीर्लिङ् benediction.

Digitized by Google

पूजयेदशनं नित्यम्। सत्यं ब्रूयात् प्रियं ब्रूयात्। मनो धर्मे निवेशयेत्। गुणहीनं विवर्जयेत्। यथा नीरोगो भवेयं तथा कुरु। भवन्तः समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत्। इन्द्रियाणां संयमे यत्नमातिष्ठेत्। न दत्वा परिकीर्त्तयेत्। न बाहुभ्यां नदीं तरेत् यत् श्रेयः स्यान्निश्चितं तन्मे ब्रूहि।

सदाचारं निषेवेत। नात्मानमवमन्येत। पितरौ सेवेत नित्यम्। सद्भिः सह सदासीत। शयनस्थो न भुञ्जीत। नाविस्पष्टमधीयीत। राजा प्रजासु पितृवत् वर्त्तेत। अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम्। शून्यगेहे नैकः शयीत।

स्थिरस्ते प्रशमो भूयात्। चिरं जीव्यात् महाराजः।

LESSON 8.

8. लट् and लृट् are used in the Future Tense.

9. लङ् denotes that something might have happened, if anything else had taken place; so that neither of the two actions did really come to pass.

पुण्यमर्जय, स्वर्गलोकं गमिष्यसि। त्वञ्चेत् मद्वचनं न श्रोष्यसि तदा घोरे नरके पतिष्यसि।

Digitized by Google

स्वर्गलोके क्षुत्पिपासे न भविष्यतः। न रत्नमन्विष्यति, सृष्टे हि तत्। यथोक्तं करिष्यामः, न किञ्चित् परिहास्यते।

उदङ्कस्तव कल्याणम् भविता। कथं नु एको भवितासि इति त्वां शोचामि। अहमचिरेणैव विद्यालयं गन्तास्मि। श्वः प्रभाते भवान् द्रष्टा दिव्यान्यस्त्राणि सर्व्वेषः। युध्यस्व, जेतासि रणे सपत्नान्।

यदि वृष्टिर्नाभविष्यत्तदाहं तत्रागमिष्यम्। किं प्राभविष्यदरुणस्तमसां बधाय, तच्चेत् सहस्रकिरणो भुवि नाकरिष्यत्।

LESSON 9.

10. तव्य, अनीय and य are used in the Future Tense. They also denote duty, and are used in the कर्म- and भाव- वाच्य।

हीनसेवा न कर्त्तव्या। कर्त्तव्यो मद्दाश्रयः। त्याज्यः दुष्टः प्रियोऽपि। मान्यो भगवान् शङ्करः। अनतिक्रमणीयः राजनिदेशः। जेतव्याः क्रोधादयो रिपवः। पालनीया प्रभोराज्ञा। आपदि वृद्धस्य वचनं ग्राह्यम्। क्व त्वं मया द्रष्टव्यः। सहजं कर्म

Digitized by Google

न त्याज्यम्। दुर्जनेन सह न स्थातव्यम्। सावधानेन वर्त्तितव्यम्। अत्रान्तर्जले दुष्टग्राहेण भाव्यम्।

LESSON 10.

11. क्त and क्तवत् are used in the Past Tense. The former is *generally* used in the कर्म- and भाव- वाच्य, the latter always in the कर्तृ वाच्य।

त्वमेवं कृतवान्। स विन्ध्याटवीं गतवान्। कथय कथमेषा पारिजातमञ्जरी तव श्रवणसंसर्ग-मासादितवती। स बाल एव राज्यमासादितवान्।

किमर्थमाहूता वयम्? तथा मधुरभाषी त्वं केनासि शिक्षितः वक्तुमप्रियम्? अनेन भुक्ता भोगा, निभृताश्च भृत्याः, समर्पितानि च मित्रेषु धनानि। भयेन प्रव्यथितं मनो मे। अवमानश्च शत्रुश्च युग-पद्विहितौ मया। आख्यासितोऽहं भवता।

LESSON 11.

12. When तव्य, अनीय, य and क्त are used in the भाव-वाच्य, the words formed by them are Abstract Nouns.

13. When these suffixes are used in the कर्मवाच्य, the words formed by them are adjectives, qualifying the the objects (कर्म) of their roots. Thus in त्याज्यः दुष्टः

Digitized by Google

(Lesson 9), त्याज्य is an adjective qualifying दुष्ट, which is the object of the root त्यज्

14. When क्त is used in the कर्तृवाच्य, the word formed by क्त, is an adjective qualifying the subject (कर्त्ता) of the root of the word. Thus in गताऽसौ दिवसः, गत is an adjective qualifying दिवस, which is the subject of the root गम्. *cf.* जीवितो महाराजः, दिवसं स्थितः (Lesson 13).

कर्त्तव्यं साधयामि। विदितं मया वेदितव्यम्। अस्ति किञ्चिद् विज्ञाप्यम्। इदानीं करणीयं चिन्त्यताम्। वक्तव्यमुच्यताम्। त्यज्यतामिदं अध्यवसितम्। पुरावृत्तं श्रुतम्। मूढः सुहृद्भाषितं न शृणोति। यमा जीवन्ति सर्व्वभूतानि तस्य जीवितमर्थवत्। अहो गीतमाधुर्य्यम्। ध्येयं ब्रह्म। धनोपार्ज्जनं चिन्त्यम्। पूज्योऽतिथिः। कर्त्तव्यमेतत्। गतं वयः न तु शौर्य्यम्। तेनाकार्य्यं कृतम्। आज्ञा गुरूणां ह्यविचारणीया।

Lesson 12.

15. The First Case-ending Suffix (प्रथमा विभक्ति) is applied—

(1) to the subject (कर्त्ता) of a verb (either expressed or understood) in the कर्तृवाच्य

(2) to the object (कर्म) of a verb in the कर्मवाच्य

Digitized by Google

(3) to a word, governed by an अव्यय (इति, अही &c.)

(4) to a word in the Vocative Case. In this case, the First Case ending Suffix, सु, is generally modified to some extent.

परिषदियमृषीणाम्। अहो भ्रातृस्नेहः। इत इतो भवान्। आचार इति यजमानोऽपि यज्ञे निमन्त्रितोऽसि। मित्रमिति अक्षरद्वयं अमृतमयम्। स वत्सलार्थो हिते रतः। वेदोऽखिलं धर्ममूलम्। अज्ञो भवति वै बालः। कस्यायमाश्रमः पुण्यः? दृष्टो मया भार्गवः। तेनेदमाचरितम्। इयमेव सा अङ्गुरी। नमन्ति फलिनो द्रुमाः। राम इत एहि। हितं मनोहारि च दुर्लभं वचः। कष्टं खल्वनपत्यता।

Lesson 13.

16. The Second Case-ending Suffix (द्वितीया विभक्ति) is applied—

(1) to the object of a verb in the कर्तृवाच्य

(2) to words governed by विना, ऋते, अनु, धिक्, प्रति, &c.

(3) to words denoting—

(*a*) time, during which some action continues (*e. g.* मुहूर्तम्)

(*b*) distance, over which some action extends (*e. g.* क्रोशम्)

Digitized by Google

(4) to adverbs. These are also neuter and singular (*e. g.* निःशब्दम्)

उद्योगिनंपेमुति लक्ष्मीः । धनमृते कुतः सुखम् । धिङ् मूर्खम् । भ्रातरस्तेऽनुतप्यन्ति त्वां विना । मम मृगयां प्रति निरुत्सुकं चेतः । मित्रलाभमनु लाभः सम्पदः । अहं तत्र कञ्चित् कालमतिष्ठम् । मुहूर्तं विलम्बः सह्यताम् । क्रोशं कुटिला नदी । स तत्र कतिचं दिवसं स्थितः । विदर्भान् यातुमिच्छामि, शीघ्रं मे यानमादिश । दूरं हि त्वमागतः । दूरमधिरूढः सविता । नय मां रामान्तिकम् । जानीहि मां देवदत्तम् । केचित् प्रवयसस्त्वां दिदृक्षवः । कथमीदृशीमवस्थां गतोऽसि । निःशब्दं स्थातव्यम् ।

Lesson 14.

17. The Third Case-ending Suffix (तृतीया विभक्ति) is applied—

(1) to the subject of a verb in the कर्म- and भाव-वाच्य

(2) to a करण *i. e.* an instrument (or means) by which some action is brought about (*e.g.* पादेन) :

(3) to nouns governed by सह, सार्धं, समं (expressed or understood) ; कि, अर्थं, कृतं (in the sense of 'of no avail') :

Digitized by Google

(4) to nouns, in order to denote cause or reason for something (*e. g.* पुष्पेण) : .

(5) to words which may be construed into adjectives (*e. g.* सुकुटेन – सुकुटेन उपलक्षिता) :

(6) to nouns, such as प्रकृति, नामन् etc., used adverbially (*e. g.* नाम्ना) :

(7) to words denoting time or distance, in order to indicate completion of the action, implied by the principal verb of the sentence, within the limit of such time or distance (*e. g.* दिवसेन जिता: शत्रव:, क्रोशेन मन्त्र: श्रुतीत:). When, however, completion of the action is not implied, the second case-ending suffix will be applied to such a word (*e.g.* मासमधीतं व्याकरणम् । क्रोशं स्थिती गिरि:) :

N. B.—(i) The Accusatives of the roots कृ and सिच् are regarded as Instrumentals, while their Locatives are treated as Accusatives (रावणं शरवर्षैरवाकिरत् – showered arrows on Ravana ; नवाम्बुभिर्मेघमाला शैलं सिञ्चति=clouds are pouring drops of fresh water on the hill).

—(ii) The Accusative of the root यज् is sometimes treated as Instrumental (इजे स विविधैर्यज्ञै: – He performed many sacrifices).

तप्तं सुरैरत्र तप: । धर्म: सत्येन रक्ष्यते । सुकरमपि कर्म एकेन दुष्करम् । क्षणो देवैरपि सुदु:सह: दुर्वाच्य: पाणिना वायुर्दु:स्पर्श: पाणिना शशो :

Digitized by Google

पञ्चाशमेवागतोऽहम्। भवन्ति नम्रास्तरवः फलोद्गमैः। क्षुद्रमञ्जलिना पशमानयेत्। पुष्पैरर्चयेद्देवान्। न पादेन स्पृशेदग्निम्। बाहुयुद्धेन विजितोऽयं राजा। कोऽर्थः मूर्खेण पुत्रेण। दुर्घटं तेन सख्यम्। मया सार्द्धमत्रैव स्थीयताम्। दुर्जनेन समं वैरं प्रीतिञ्चापि न कारयेत्। नासद्भिः सह मित्रतामाचरेत्। पुण्येन दृश्यते हरिः। कतिपयैरेव अहोभिः मे प्रियं भविष्यति। क्षणेन क्षपां क्षपयामास। विचित्रेण मुकुटेन शोभते भगवती अम्बिका। जटिलैः केशैः स दावं विचचार। भूषाभिः शिवो दृष्टः। स पतितैःफलैराहारञ्चकार। अलमतिविस्तरेण। कृतं कलहेन। किमत्रावस्थानेन। त्रिरात्रमुषितो राजा जलमात्रेण वर्त्तयन्। प्राणव्ययेनापि रक्षणीयाः सुहृदसवः। स नाम्ना सत्यवान्। प्रकृत्या मधुरं गवां पयः। तदनुसरणक्रमेण व्याकुलश्चलितः। क्षत्रियाणां वीरधर्मेण मृत्युः श्लाघ्यः। रामः रावणं शरवर्षैरवाकिरत्। तरवस्तं प्रसूनैरवाकिरन्। दारान् रक्षेत् धनैरपि।

Digitized by Google

LESSON 15.

18. The Fourth Case-ending Suffix (चतुर्थी विभक्ति) is applied—

(1) to a word, governed by नमस्, स्वस्ति, स्वागतम् etc.

(2) to a word denoting a person, to whom something is given :

(3) to a word denoting a person, aimed at by some action, implied by a verb other than 'to give' (प्रसादं कुरु मे देव) :

(4) to one who is pleased, when the root रुच् is used :

(5) to a thing, in order to denote 'for the sake of' (*e. g.* शर्मणे – for the sake of happiness) :

(6) to the object of a तुमन्त verb, understood (चापलाय – चापलं कर्तुम्) :

(7) in the place of तुम् understood, when the तुमन्त word is replaced by a verbal noun.(*e, g.* दानाय – दातुम्) :

स्वागतमतिथये । स्वस्ति राज्ञे । नमः गुरुभ्यः । प्रसीद भगवन्नयमञ्जलिस्ते । प्रसादं कुरु मे देव । आसनमासनमार्य्याय । धनं देयं दुर्गताय । स तस्मै उचितां पूजामकरोत् । विदितं मया विज्ञातव्यं, यावद्रामाय निवेदयामि । देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः । सन्ततिः परत्रेह च शर्मणे ।

Digitized by Google

चापलाय प्रणोदितोऽसि कथम् ? तदन्वेषणाय दिशि दिशि दूताः प्रस्थापिताः। रावणस्य बधाय उपायं कर्त्तुमर्हसि। कुरु यदभिरुचितं भवते। मह्यं रोचते इदं क्रीड़नकम्। दानाय भोगाय च सतां वित्तम्। वनाय मुक्ता धेनुः। प्रवर्त्ततां प्रकृतिहिताय पार्थिवः। उत्तिष्ठ युद्धाय कृतनिश्चयः।

Lesson 16.

19. The Fifth Case-ending Suffix (पञ्चमी विभक्ति) is applied—

(1) to the source of any action (*e. g.* गुरुमुखात्) : Here the fifth case-ending suffix is equal to 'from.'

(2) to the Accusative and Locative of a त्वान्त verb understood (मद्वचनात् = मद्वचनं आकर्ण्य ; आसनात् = आसने उपविश्य) :

(3) to the object, to which something is regarded as superior or inferior (*e. g.* वार्यो:) :

(4) to a word, in order to denote cause or reason (*e.g.* लोभात्) :

(5) to the words दूर and अन्तिक, when they do not qualify any noun :

(6) to words goverened by आ, (in the sense of मर्य्यादा or अभिविधि), प्रभृति, पर etc. :

वृष्टेरन्नं जायते। मेघाद् वृष्टिर्भवति। बालादपि सुभाषितं ग्राह्यम्। आचाराद् विच्युतो विप्रो न

Digitized by Google

वेदफलमश्नुते । आ परितोषाद् विदुषां कुतो मे सन्तोषः । आ मुक्तेः संसारः । श्रुतं गुरुमुखात् । कस्माद् विभेषि । कुतः परिव्रातव्यो भवान् । मनः शीघ्रतरं वायोः । लोभात्त्यजति मित्राणि । तस्मै शुभानि वासांसि प्रददू राजशासनात् । अहं राज्ञः वचनात् त्वामन्वेष्टुमिहागतः । मद्वचनादुच्यतां सारथिः । अहो क्षणादपगतोऽयं मे सन्तापः । सुदूराज्जालापहारकान् अवलोक्य पश्चाद्धावितो व्याधः । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् । ज्ञानाद् ध्यानं विशिष्यते । एष दर्शनात् प्रभृति निष्कारण-बन्धुतां गतः । किमाश्चर्यमतः परं । आसनात् पश्यति ।

Lesson 17.

20. The Sixth Case-ending Suffix (षष्ठी विभक्ति) is applied—

(1) to denote a Possessive Case :

(2) sometimes to the subject of a verb ending in a कृत्य (तव्य, अनीय, य) suffix :

(3) to the subject or the object of a verb ending in a कृत् suffix :

(4) to the subject of a verb ending in क्त, when the suffix क्त is used in the Present Tense : (The

Digitized by Google

roots मन्, बुध् and पूज् take क्त in the Present Tense).

(5) to a number of objects, out of which some individual member or members are spoken of :

(6) to the object of the verb अनादृत्य, understood :

आतुरस्य भिषङ् मित्रम्। अशान्तस्य कुतः सुखम्। दुरवगाहा गतिर्दैवस्य। सखे ममाप्येतदेव मनसि वर्त्तते। श्रायतामधुना किमवशिष्टमङ्कः। धनानां उत्तमं श्रुतम्। भूतानां प्राणिनः श्रेष्ठाः। ब्रूहि धर्मभृतां वर, केनार्थः किं ददानि ते। सतां साध्ये सिद्धिरस्तु। नाकार्य्यमस्ति क्रुद्धस्य। भगवन् यद्यहं तेऽनुग्राह्यस्तदा मां अरोगं कुरु। मनुः मनीषिणां माननीयः। ब्राह्मणोऽसीति पूज्यो मे। न तेऽस्त्रविदितं किञ्चित्। धार्मिको नृपः सतां सम्मतः। आश्रितानां रक्षणं कर्त्तव्यम्। इदं मे शयनम्। पश्यतस्ते मरिष्यामि, रामो यद्यभिषिच्यते। प्राणाः यथात्मनोऽभीष्टाः भूतानामपि ते तथा।

LESSON 18.

21. The Seventh Case-ending Suffix (सप्तमी विभक्ति) is applied—

(1) to a word denoting अधिकरण *i. e.* the time or

Digitized by Google

place in which an action happens, or the subject-matter (विषय) of which something is stated :

(2) to a nominative absolute (भावे सप्तमी) :

(3) to a group of objects out of which some individual member or members are spoken of :

(4) optionally to words governed by प्रसित and उत्सुक. Here the Third Case-ending Suffix will also do :

तपोवने वसन्ति मुनयः । जनपदेषु न चिरमारण्यकास्तिष्ठन्ति । तिलेषु तैलमस्ति न सिकतासु । न वसन्तेऽकत्र सर्व्वे गुणाः । निर्व्वाणे दीपे किमु तैलदानम् । रात्रौ प्रकाशते शशी । विपदि धैर्य्यं न त्याज्यम् । युक्तमेतत् त्वयि । एवं कृते किं फलं स्यात् । तस्मिन्नेवं कथयति सूर्य्योऽस्तं गतः । अयि भोः किमस्मासु वः प्रतिवचनम् ? भिद्यते न सद्वृत्तमित्याकुमटहेषु । अहो प्रसादोत्कर्षः, तत्रैव गमनादेशो यत्र पर्य्युत्सुकं मनः । महत्स्वेवापराधेषु महात्मनां प्रकोपः । बुद्धिमत्सु नराः श्रेष्ठाः । स्वेषु बन्धुषु कः साधुरेवमसाम्प्रतं आचरेत् । यत्ने कृते यदि न सिध्यति कोऽत्र दोषः । ऋषिवाक्येषु मा संशयो भूत् ।

Digitized by Google

Lesson 19.

22. उद्देश्य (subject) is that to which something is to be attributed ; that which is to be attributed is विधेय (predicate). In शास्त्रं चक्षुः, शास्त्र is उद्देश्य and चक्षुस् विधेय, for (the far-sightedness of) an eye is attributed to science.

आयुर्घृतम् । सम्पद आपदां पदम् । शास्त्रं चक्षुर्विवेकिनाम् । धर्म्मसंशयेषु भवन्तः प्रमाणम् । एक एव सुहृद्धर्मः । एषोऽस्माकं मित्रम् । मया स सहायो लब्धः । नृशंसता नाम पुरुषदोषः । प्रजानां पालनमेव राजधर्म्मः । मैत्र्यं हि यत् सा प्रकृतिर्जलस्य । इदं भद्रं न पश्यामि । सर्व्वमेतद्वृतं मन्ये यन्मां वदसि केशव । प्रवादः सत्यमेवायम् । मौनं हि सम्मतिलक्षणम् । अहिंसा परमो धर्म्मः ।

Lesson 20.

23. यत् is generally followed by तत्.

24. तत् is not required when यत् is introduced into the latter part of the sentence.

25. यत् is not required when a well-known object is spoken of, or when its antecedent has been stated in a previous sentence.

यत्त प्रियं तत् क्रियतां नरेन्द्र । अज्ञानेन मया यत् कृतं तत् क्षन्तुमर्हसि । अवश्यमेव भविता यदुक्तं

Digitized by Google

परमर्षिणा। आशु त्वं लप्स्यसे पुत्रान् यदर्थं यजसे नृप। एषा सा दृश्यते पद्मा नलिनीचित्रकानना। अहो महान् प्रसादः यत् स्वयमेव भगवानागत्य मामनुगृह्णाति। कथ्यतां यत्ते मनसि वर्त्तते। यो यदर्थी महोत्सवेऽस्मिन् तत्तस्मै दीयताम्। ते हि नो दिवसा गताः। आसीत् कलिङ्गेषु रुक्माङ्गदो नाम नृपतिः। स कदाचिद् दिग्विजयव्यापारेण चन्द्र-भागानदीतीरमाजगाम।

Lesson 21.

विद्वान् सर्व्वत्र पूज्यते। महाजनो येन गतः स पन्थाः। एकश्चन्द्रस्तमोहन्ति। सुनीनाञ्च मतिभ्रमः। भिन्नरुचि र्हि लोकः। आशावधिं को गतः? भवति विज्ञतमः क्रमशो जनः। धर्म्मस्य तत्त्वं निहितं गुहायाम्। प्रयोजनमनभिसन्धाय न मन्दोऽपि प्रवर्त्तते। सर्व्वतो जयमन्विच्छेत् पुत्रादिच्छेत् पराजयम्। हंसो हि क्षीरमादत्ते तन्मिश्रा वर्ज्जयत्यपः। कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन। याज्ञा मोघा वरमधिगुणे नाधमे लब्धकामा। सूर्य्यापाये न

Digitized by Google

खलु कमलं पुष्यति स्वामभिख्याम्। विमलं कलुषी-भवच्च चेतः कथयत्येव हितैषिणं रिपुञ्च। यादृशी भावना यस्य सिद्धिर्भवति तादृशी। अङ्गारः शतधौते-नापि मलिनत्वं न मुञ्चति। शक्यं विषमपि भैषधी-कर्त्तुम्। न निम्बो मधुरायते। सर्व्वमुत्पादि भङ्गुरम्।

EXERCISE 1.

Account for the Case-ending Suffixes of the words, used in this lesson.

LESSON 22.

26. Adverbs are treated as neuter singular. The Second Case-ending Suffix is applied to them.

बहु श्रुतं त्वया। साधु समाचरितं भवता। विश्रब्धमादिश्यतां कर्त्तव्यम्। निःशङ्कमावेद्यते हृदय-खेदः। सुखमुपदिश्यते परस्य। किं दुःखितमपि जनं अतितरां दुःखयसि। उदेति पूर्व्वं कुसुमं ततो फलम्। बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः। नल ऋतुपर्णस्य गृहेऽज्ञातवासमवसत्। एवमति-निष्ठुरं सन्दिशन्ती कथमसि न लज्जिता। आलस्यं

Digitized by Google

सर्व्वथा परित्यजेत्। त्वदुक्तमाकर्ण्य तेन स्तूयमानाश्रुबिन्दु-वर्षं रुदितम्। भृशं दुःखितो भग्नाशः। एवमेतद् यदात्थ त्वम्।

LESSON 23.

27. Abstract Nouns are formed by the suffixes अण्, ष्यञ्, त्व, ता, ति, अनट् &c.

अहो माधुर्य्यं गीतस्य। अहो दृढ़प्रहारिता राजपुत्रस्य। परसम्पदसहिष्णुत्वं हि सत्पुरुषस्य लक्षणम्। इन्द्रादयः स्वयं रामस्य वन्दित्वमुपगताः। अस्त्येवान्यसमाधिभीरुत्वं देवानाम्। महावीरलाभेन महाद्युगलं साफल्यमनुभवति। एष दर्शनात् प्रभृति प्रकृत्या मे निष्कारणबन्धुतां गतः। यदनुकूलत्वेन मया चिन्तितं तदेव प्रतिकूलं संवृत्तम्। पौरुषेऽ-फलतां गतेऽपि महात्मानो नात्मानं विषादयन्ति। कथामात्रशेषतां गतस्तस्य विभवः। अथ दिवसः परिणतिं ययौ। मा क्लैव्यं गच्छ कौन्तेय। अत्रावस्थानेन वनमिदं सनाथीक्रियताम्। अत्र भवन्तं गुरुलाघवं पृच्छामि। पश्य रम्यत्वं रजनीनाथ-रश्मीनाम्।

Digitized by Google

LESSON 24.

28. The subject of a root without णिच् becomes the object of the root, when it is rendered causative by the addition of णिच्.

इहैव रथं स्थापय यावदवतरामि। भवन्तं स्ववृत्तान्तं श्रावयित्वा सद्यतामिव गतो मे शोकः। आचार्य्यः शिष्यमुपनीय वेदमध्यापयति। पायय कमलमधुरसं भवनकलहंसान्। अयं भृगुः व एतच्छास्त्रं श्रावयिष्यति। गुरुर्मां इदं शास्त्रं विधिवद् ग्राहयामास। एको रविः कृत्स्नं लोकं प्रकाशयति। आरोपय रथोपरि राजपुत्रम्। आज्ञापय किं कर्त्तव्यम्। शत्रुघ्नो गन्धर्व्वान् आयुधमत्याजयत्।

LESSON 25.

THE PARTICIPLES शतृ AND शानच्.

29. In the Active Voice, शतृ is used when the root is of the परस्मैपदी class, and शानच्, when the root is of the आत्मनेपदी class. शानच् is always used in the Passive Voice.

स कञ्चिदापतन्तं गजं बाणेन विव्याध। मान्यं गुरुजनं धर्षयता त्वया स्वगुणानाम् असदृशं कृतम्।

Digitized by Google

अहं सुसूक्ष्ममपि विचिन्तयन् मयि अपराधलवमपि न पश्यामि। कियदनुसरन् अज्ञान् असौ आगतः। सुहृदां वचने तिष्ठन् यशः प्राप्नोसि। स हसन्ना-गच्छति।

सुरासुरै र्मथ्यमानात् क्षीरसागरादुद्गतः पारिजात-नामा पादपः। हन्यमानेऽपि शरीरे आत्मा न हन्यते। सुखैरनिलैः सेव्यमानो भ्रमति नरेन्द्रः। रावणेन शरोत्तमे सन्धीयमाने वसुन्धरा चचाल। अहं पूर्य्यमाणस्य जलकुम्भस्य निःस्वनमश्रौषम्।

पताकाभिः शोभमानं पश्यतु पुरमार्य्यः। नक्षत्र-गणै र्विराजमानं आकाशं दृष्ट्वा कस्य चित्तं न मोदते। मेघगर्ज्जितमाकर्ण्य त्वरमाणो गृहं प्रविशति बालकः। ये क्षत्रिया जयमाशंसमाना रणाजिरे पतन्ति न ते शोच्याः। जानीहि मां सुखासीनम्।

Lesson 26.

30. When actions indicated by two roots take place in succession, क्त्वा may be added to the root that indicates the former action, provided the roots have the same subject.

Digitized by Google

31. क्त्वाच् is replaced by यप्, when there is a prefix to the root.

सर्व्वः प्रार्थितमधिगम्य सुखी सम्पद्यते। रामो राज्यसुखं त्यक्त्वा वनं गतः। गुरुवचनमुत्क्रम्य न शर्म लभ्यते। जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्। उत्थाय हृदि लीयन्ते दरिद्राणां मनोरथाः।

LESSON 27.

32. The Infinitive Mood is formed by the suffix तुम्. तुम् is also used before words denoting time.

न युक्तं शोकार्त्तमेकाकिनं कर्त्तुम्। दैवं न केनापि प्रतिकूलयितुं शक्यते इति केषाञ्चिन्मतम्। न स्वयमन्वपि कर्त्तव्यमलमस्मि ज्ञातुम्। नार्हसि निष्फलां कर्त्तुमभ्यर्थनामिमाम्। आ मूलात् श्रोतुमिच्छामीमं वृत्तान्तम्। अपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि। कालोऽयं विद्यालयं गन्तुम्।

LESSON 28.

33. सन् indicates desire; शुश्रूषुः – desirous of hearing.

शुश्रूषुः गुरुगतां विद्यामधिगच्छति। दीर्घमायुर्जिजीविषुः सदाचारवान् भवेत्। ब्रूहि कथं किञ्च

Digitized by Google

चिकीर्षसि। कथमेभ्यो याचमानेभ्यः पित्र्यमंशं न दित्ससि। अहं महाराजं दिदृक्षुः। मेघं दृष्ट्वा मानसं यियासन्ति हंसाः। कष्टं सह्यिष्णुरयं जनः।

Lesson 29.

34. The comparatives are formed by the suffixes तर, and ईयसुन्; the superlatives by तम and इष्ठन्।

35. The suffixes चित् and चन indicate uncertainty. They are added to the stem किम्, after proper case-ending suffixes have duly been applied to it.

36. The suffix दा indicates time and always replaces a seventh case-ending suffix.

कदा = कस्मिन् (काले)। तदा = तस्मिन् (काले)।

धनाद् धर्मो गरीयान्। गिरिषु हिमवान् उच्चैस्तमः। कतमेन दिग्विभागेन गतः स पक्षी? युवयोः कतरो गृहीतविद्यः। हरिः छात्रेषु श्रेष्ठः। अथ अस्ति काचिद्रामस्य प्रवृत्तिः? जानासि किञ्चित् शत्रूणां चेष्टितम्? मम एतावान् लोभविरहो येन स्वहस्तगतमपि सुवर्णकङ्कणं यस्मै कस्मैचित् दातुमिच्छामि। वेदाहं सर्व्वभूतानि मान्तु वेद न कश्चन।

कदा विद्यालयं गमिष्यसि? यदैव धनावाप्ति-

Digitized by Google

भवति तदैव व्यसनेषु याति बुद्धिः। अहमेकदा सागरोपकूलं गतवान्। सर्व्वदा सावधानेन वर्त्तितव्यम्।

Lesson 30.

37. The repetition of a word in a sentence may indicate—

(1) surprise (अश्वोऽश्वः &c.)
(2) extreme distress—हा हा हतोऽस्मि।
(3) extreme joy—एह्येहि वत्स।
(4) hastiness—गच्छ गच्छ = शीघ्रं गच्छ।

In the expression भीतभीत, the second भीत implies प्रकार.

In वृक्षं वृक्षं अभिसिञ्चति, वृक्षं वृक्षं = every tree.

कः कोऽत्र भोः। कः कोऽत्र द्वारि तिष्ठति। कुमार अश्वोऽश्व इति कोऽपि भूतविशेषः जनपदेषु श्रूयते सोऽयमस्माभिः प्रत्यक्षीकृतः। कथं भीतभीत इव दृश्यसे। न भेतव्यं न भेतव्यम्। न हन्तव्यो न हन्तव्योऽयमाश्रममृगः। एह्येहि वत्स इह आस्यताम्। आसनमासनमार्य्याय। वृक्षं वृक्षमभिसिञ्चति उद्यानपालः। हा हा हतोऽस्मि मन्दभाग्यः।

Digitized by Google

LESSON 31.

INDECLINABLE WORDS (अव्यय).

दिष्ट्या सुप्रभातमद्य यदयं देवो दृष्टः। अहो प्रियदर्शनः कुमारः। अहो क्षिप्रकारिता रामस्य राज्ञः। मामेव शरणं व्रज। एतदेव जानामि। एते त एव गिरयः। इदं तावदग्रक्यमेव द्रष्टुम्। अत्र तावदासनपरिग्रहं करोतु देवः। अपि कुशलं ते। देवा अपि क्षणं दिदृक्षवः। त्वं यत्र गच्छसि अहमपि तत्र यास्यामि। अद्य खलु शिष्टानध्याय इति उद्धतं खेलतां बटूनां कलकलः। किं मन्यसे ऋषोद्यं तदिति। हा धिक् प्रमादः संवृत्तः। पुरा किल भगीरथेन आनीता गङ्गा। यज्ञः किल ते प्रियम्। किं नाम दण्डकेयम्। अहो नु भोश्चित्रमेतत्। सतां सङ्गिःसङ्गः कथमपीह हि पुण्येन भवति। कुत आगम्यते किम् प्रयोजनं वा दण्डकारण्यप्रवेशे? मनश्चञ्चलं तत्तु अभ्यासेन निरुद्ध्यते। वेदाहं सर्व्वभूतानि मान्तु वेद न कश्चन। अति हि

Digitized by Google

नाम शोभसे रथस्थः। अतीव मे कौतुकं वर्त्तते। आः किमुक्तं भवति? हन्त वर्द्धते ते संरम्भः।

EXERCISE 2.

Explain the force of the indeclinable words (अव्यय) in the above lesson.

LESSON 32.

बहुव्रीहि AND कर्मधारय COMPOUNDS.

38. बहुव्रीहि compounds are adjectives or adverbs; कर्मधारय compounds are generally nouns.

In the former neither of the constituent words is principal, both serving to define a third thing; in the latter the second constituent word is the principal one. But there is a class of कर्मधारय in which both the constituent words are adjectives qualifying the same noun (*e. g.* सुशोभितः).

कर्मधारय compounds preceded by a numeral is known as द्विगु (*e. g.* त्रैलोक्य).

39. The following classes of the कर्मधारय compound may be noticed—

(1) an adjective+a noun; पूर्णेन्दुः

(2) an adjective+an adjective; सुशोभितः

(3) मध्यपदलोपी (a noun+a noun, with an adjective suppressed between them); छाया-(प्रधान)-वृक्षः।

(4) a noun+an adjective, with an इव implied bet-

Digitized by Google

ween them ; घन इव श्यामः = घनश्यामः (उपमान-समासः) ।

(5) a noun+a noun, both describing the same person ; ब्रह्मा चासौ ऋषिश्चेति ब्रह्मर्षिः ।

(6) a noun+a noun, with an इव implied after them ; पुरुषः सिंह इव = पुरुषसिंहः (उपमिति-समासः) ।

(7) a noun+a noun, with an एव implied between them ; शोक एव सागरः = शोकसागरः (रूपक-समासः)

(8) a numeral+a noun ; त्रैलोक्यस्य (द्विग्-समासः) ।

धैर्यधना हि साधवः । फलाहारा मुनयः स्वर्गफलो यज्ञः । पुण्यतोया गङ्गा । बहुफलं दानम् । मन्दभाग्यो दरिद्रः । मन्त्रीबलो महीपतिः । लोभो व्याधिरनन्तकः । सुखस्पर्शश्चन्दनः । सौम्यमूर्त्तिश्चन्द्रः । सफलं ज्ञानवतो जन्म । क्षमां कथमसाधिधस्त्यजेत् । सन्तोषमूलं हि सुखम् । पङ्कजलक्षणा शरत् । वृक्षं क्षीणफलं त्यजन्ति विहगाः । पद्मगन्धि रामस्य मुखं कदा द्रक्ष्यामि । क्षितपूर्व्वमुवाच ।

पूर्णेन्दुरुदेति । जयतु महाराजः । कुत्र स पुरुषसिंहः । योग्यसचिवे न्यस्तो राज्यभारः । ब्रह्मर्षे नमस्ते । अयं छायावृक्षः । दुस्तरः शोक-सागरः । त्रिलोकनाथेन त्वया साधु कृतम् । त्रैलोक्य-

Digitized by Google

स्यापि प्रभुत्वं त्वयि युज्यते । प्रतापवान् रावणाग्निः
रामपयोधरेण निर्व्वापितः । प्राहुः सामपदं मैत्रम् ।
सुप्तोत्थितेयं गौः । घनश्यामोऽयं पुरुषः ।
स्नातानुलिप्तोऽयं विप्रः । श्रूयतां जलदगम्भीरं भाषितं
दूतस्य । सरितः रामशोकेन सन्तप्तकलुषोदका
न्ते । श्वेतपुष्टाङ्गोऽयं मृगः । निर्वृष्टलघवो
गाः ।

LESSON 33—तत्पुरुष COMPOUNDS.

40. To determine the particular class of a तत्पुरुष compound, reference should be made to the case-ending suffix that may suitably be applied to the first of the two constituent words. Thus शरत्कालागतः is of the second class, because a second case-ending suffix may be applied to the word शरत्, for it is governed by the active verb आगतः (= प्राप्तः). स्रोत्रसाध्यं is of the third class, because the third case-ending suffix may be applied to स्रोत्र, or it is instrumental (करण) to साध्यम्. ब्राह्मणहिताय is of the fourth class, because a fourth case-ending suffix may be applied to ब्राह्मण, for it is governed by हित. राज्यभ्रष्टः is of the fifth class, because a fifth case-ending suffix may be applied to राज्य, for it is ablative (अपादान). तपोधनं is of the sixth class, because a sixth case-ending suffix may be applied to the word तपस्, for it is genitive. वनवासः is of the seventh class,

Digitized by Google

because a seventh case-ending suffix may be applied to वन, for it is locative.

An उपपद compound may be resolved into an expression ending in यत् तत्—तत्त्वं जानाति यः स तत्त्वज्ञानी। स्वेच्छया आचरति यः स स्वेच्छाचारी।

कर्मधारय may be said to be a तत्पुरुष compound of the first class.

निवेदय मामुद्यानगतम्। रक्षणीयाः शरणागताः। क्लेशसाध्यं तपः। हस्तप्राप्यमिदं फलम्। अहो प्रवातसुभगोऽयं वनोद्देशः। युक्तियुक्तं ते वाक्यम्। नमो गोब्राह्मणहिताय गोविन्दाय। यज्ञभूमिः विधीयताम्। राज्यभ्रष्टो नृपो विषादमुपगतः। पिबत भागवतामृतं शुकमुखविनिर्गतम्। दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः। क्षुत्तापो मत्सरः स्मृतः। त्वदायत्तं मे जीवितम्। रामाधीनं हृदयं वैदेह्याः। अयं आश्रितवत्सलः। सुखार्थिनः कुतो विद्या। रन्ध्रोपपातिनः अनर्थाः। स्वेच्छाचारी भीत एवास्मि भर्तुः। जलस्थायि जीवितम्। प्रयोजनवशाद् ग्रामान्तरं गच्छामि। अतीन्द्रियोऽयं विषयः। भविता न विचारचारु तथापि श्राव्यमिदम्।

Digitized by Google

LESSON 34—द्वन्द्व COMPOUNDS.

41. द्वन्द्व compounds are of three classes—

(1) इतरेतर-योगे—never singular; मृगकाकौ (मृगश्च काकश्च)। सीतारामलक्ष्मणाः (सीता च रामश्च लक्ष्मणश्च ।)

(2) समाहारे—always neuter and singular—पुण्य-पापम् (पुण्यञ्च पापञ्च तयोः समाहारः)।

(3) एकशेष—when only one of the constituent words is retained—पितरौ (माता च पिता च)।

रामलक्ष्मणौ आगच्छतः। तत्र मृगकाकौ निवसतः। कामक्रोधौ हि पुरुषं अर्थेभ्यो व्यपकर्षतः। अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः। आदित्यो हि नक्षत्रग्रहतारकानामधिपः। स मृगव्याधसर्पशूकरानपश्यत्। स वन्येन फलमूलेन जीवति। रात्रिन्दिवं गन्धवहः प्रयाति। अत्र भवन्तमेव गुरुलाघवं पृच्छामि। अनित्ये सुखदुःखे। पुण्यपापं अत्येति हरिः। गुरोर्गतिभाषितचेष्टितं नानुकुर्व्वीत। पित्रोर्वशे भव। मयुरौ विरुतः।

LESSON 35—अव्ययीभाव COMPOUNDS.

42. अव्ययीभाव—The combination of an अव्यय with a noun, the meaning of the former predominating in the compound word. Such a compound is regarded as an अव्यय.

Digitized by Google

आ मृत्योः श्रियमन्विच्छेत्। तस्मै मुनयः यथार्हं पूजामकरोत्। प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः। महर्षेरनुमालिनीतीरमाश्रमपदं दृश्यते। यथाकाममर्चिता अतिथयः। गजैरुत्पाट्यन्ते उपकूलद्रुमाः। आकूलपूर्णेयं सरित्। कृतं भवता निर्मक्षिकम्। अविघ्नमस्तु ते। अयमभ्यर्कबिम्बं स्थितो मुनिः। प्रत्यग्नि शलभाः पतन्ति। अनुवनमग्निर्गतः। किमीश्वराणां परोक्षम्। यथाग्नि क्रियताम्। अनुक्षणं शशो ह्रानिमधिगच्छति। यथेच्छं न व्यवहर्त्तव्यम्।

LESSON 36—सुप्सुपा COMPOUNDS.

43. सुप्सुपा compounds—

(1) an adverb+an adjective ; पूर्वं दृष्टं = दृष्टपूर्वम्।

(2) with न (नञर्थं) ; न अतिदूरे = नातिदूरे. This न is not changed into अ or अन्.

44. नञ् compounds—Here नञ् is changed into—

(1) अ before a consonant—न श्रुतः = अश्रुतः।

(2) अन् before a vowel—न आहृतः = अनाहृतः।

इदमच्छोदाभिधानमतिमहत् सरः। निर्भरविकसितं वनम्। अश्रुतपूर्व्वेयं वाणी। मया दृष्टपूर्व्वमिदं फलम्। श्रुतपूर्वं ह्येतदस्माभिः कर्णामृतम्।

Digitized by Google

नातिशीतोष्णः वसन्ते वातः। आश्रमस्य नातिदूरे मालिनी नाम नदी।

अध्यनामयं राज्ञः। अमोघां देहि मे शक्तिम्। अनाहूतो यज्ञभूमिं मा गमः। अतिभोजनमनायुष्यम्।

LESSON 37.

धनेन किं दानोपभोगहीनेन। दत्तभुक्तफलं वित्तम्। व्याघ्रगजादिसेवितमरण्यम्। तुल्यनिन्दास्तुतिर्योगी। कलहंसधवलाम्बरोऽयं विप्रः। शैशवाभ्यस्तविद्यो यौवने सुखभाग् भवति। सूर्य इव प्रतिदिनोदीयमानप्रतापोऽयं नृपः। मयूरहंसखननादितानि पुष्पोपकीर्णानि पश्यतु भवान् गिरिसृङ्गाणि।

EXERCISE 3.

Expound the compound words in the above lesson with reference to grammatical rules in each case.

LESSON 38.

रामसुग्रीवयोर्मैत्रीकरणम्।

सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य चेष्टितम्।
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम्॥

बालः। वत्स सुग्रीव!

सुग्रीवः। आर्य प्रसीदाज्ञापय।

Digitized by Google

बाली। वत्स कथय कस्तवास्ति।

सुग्रीवः। गुरुः स्वामी च।

बाली। त्वन्तु मम कः?

सुग्रीवः। शिष्यः प्रेष्यश्च।

बाली। वत्स कथय क आवयोरन्योन्यधर्मः।

सुग्रीवः। वशित्वं वो वश्यता च मम।

बाली। तं हस्ते गृहीत्वा तर्हि दत्तोऽसि रामाय।

रामभद्र! नन्वेष गृह्यताम्।

रामसुग्रीवौ। को नु पूज्यस्य गुरोर्वचनं न बहु मन्यते?

बाली। वत्स सुग्रीव ब्रह्मपुत्रादाचार्य्यात् जाम्बवतः कौटशस्त्वया मैत्रीधर्म आगमितः?

सुग्रीवः। प्राणैरपि हिता हत्तिरद्रोहो न्याजवर्जनम्।
आत्मनीव प्रियाधानमेतन्मैत्रीमहाव्रतम्॥

बाली। रामभद्र! तवापि भगवतः सहस्र-किरणान्वयपुरोहिताद् वशिष्ठादेष एव हि सम्प्रदायः।

रामः। आर्य्य अथ किम्।

बाली। तदनेन मैत्रीधर्मेण भवद्भ्यामन्योन्यस्य वर्त्तितव्यम्। मदनुरोधात् क्रियतामुपनिबन्धः अग्नि-

Digitized by Google

साक्षिकश्च। समयो नातिवर्त्तते। सन्निहित एवायं मतङ्गयज्ञाग्निः।

राम-सुग्रीवौ। अन्योन्यहस्तग्राहम्।

पुरा मतङ्गयज्ञाग्नौ सख्यं निर्वृत्तमावयोः।
मनेव हृदयं तेऽस्तु तवेव हृदयं मम॥

EXERCISE 4.

1. In what voice is the suffix क्त in चेष्टितं used?
2. Account for the case-ending suffixes in रामेण, शिष्यः, वत्स, रामाय, जाम्बवतः, प्राप्तैः आलभि, वशिष्ठात्, मैत्रीधर्मेण, अन्योन्यस्य and मदनुरोधात्.
3. Account for the लोट् in अस्तु (मनेव हृदयमस्तु).
4. Explain उपनिबन्धः, सम्प्रदायः and अन्वय.
5. Expound the following compounds:—मैत्रीमहाव्रतम् सहस्रकिरणान्वयपुरोहितात्, अग्निसाक्षिकः, मतङ्गयज्ञाग्निः।

LESSON 39.

1. यमी वैवस्वती देवी यस्यैष हृदि स्थितः।
तेन चेदविवादस्ते मा गङ्गां मा गयां व्रज॥
2. एक एव सुहृद् धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति॥
3. अहन्यहनि भूतानि गच्छन्ति यममन्दिरम्।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरम्॥
4. अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः।
ऐश्वर्य्यं प्रियसंवासो गृध्येत्तत्र न पण्डितः॥

Digitized by Google

बाली। वत्स कथय कस्तवारिः।

सुग्रीवः। गुरुः स्वामी च।

बाली। त्वन्तु मम कः?

सुग्रीवः। शिष्यः प्रेष्यश्च।

बाली। वत्स कथय क आवयोरन्योन्यधर्मः।

सुग्रीवः। वशित्वं वो वश्यता च मम।

बाली। तं हस्ते गृहीत्वा तर्हि दत्तोऽसि रामाय।

रामभद्र! नन्वेष गृह्यताम्।

रामसुग्रीवौ। को नु पूज्यस्य गुरोर्वचनं न बहु मन्यते?

बाली। वत्स सुग्रीव ब्रह्मपुत्रादाचार्य्यात् जाम्बवतः कौटशस्त्वया मैत्रीधर्म आगमितः?

सुग्रीवः। प्राणैरपि हिता हत्तिरद्रोहो व्याजवर्जनम्।
आत्मनीव प्रियाधानमेतन्मैत्रीमहाव्रतम्॥

बाली। रामभद्र! तवापि भगवतः सहस्रकिरणान्वयपुरोहिताद् वशिष्ठादेष एव हि सम्प्रदायः।

रामः। आर्य्य अथ किम्।

बाली। तदनेन मैत्रीधर्मेण भवद्ग्रामन्योन्यस्य वर्त्तितव्यम्। मदनुरोधात् क्रियतामुपनिबन्धः अग्नि-

Digitized by Google

साक्षिकश्च। समयो नातिवर्त्तते। सन्निहित एवायं मतङ्गयज्ञाग्निः।

राम-सुग्रीवौ। अन्योन्यहृदयाहम्।

पुण्ये मतङ्गयज्ञाग्नौ सख्यं निर्वृत्तमावयोः।
मनैव हृदयं तेऽस्तु तवैव हृदयं मम॥

EXERCISE 4.

1. In what voice is the suffix क्त in चेष्टितं used?

2. Account for the case-ending suffixes in रामेण, शिष्यः, वत्स, रामाय, आम्बवतः, प्राप्तैः आलानि, वशिष्ठात्, मैत्रौधर्मेण, अन्योन्यस्य and मदनुरोधात्.

3. Account for the लोट् in अस्तु (मनैव हृदयमस्तु).

4. Explain उपनिबन्धः, सम्प्रदायः and अन्वय.

5. Expound the following compounds :—मैत्रौमहाव्रतम् सहस्रकिरणान्वयपुरोहितात्, अग्निसाक्षिकः, मतङ्गयज्ञाग्निः।

LESSON 39.

1. यमो वैवस्वतो देवो यस्यैष हृदि स्थितः।
तेन चेदविवादस्ते मा गङ्गां मा गयां व्रज॥

2. एक एव सुहृद् धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति॥

3. अहन्यहनि भूतानि गच्छन्ति यममन्दिरम्।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरम्॥

4. अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः।
ऐश्वर्य्यं प्रियसंवासो गृध्येत्तत्र न पण्डितः॥

Digitized by Google

5. न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥

EXERCISE 5.

Sl. 1. Account for the case-ending suffixes in तेन and तं

Sl. 2. Explain the force of एव, अपि and तु. Why has यः no correlative (सः) after it ?

Sl. 3. Account for the repetition of the word अङ्गानि ? Parse अतः. In what voice is the suffix क्त in भूतानि used ? Distinguish between उद्देश्य and विधेय and point out the विधेय in क्षमाश्रेयस्.

Sl. 4. अनित्यं qualifies several nouns, some of which are masculine and some neuter. How is it, then, that it (अनित्यं) has been treated as a neuter rather than as a masculine ? What is the meaning of सञ्चय and in what sense has it been used in the text ?

Sl. 5. What is meant by कामानाम् and how will you derive it ? Parse उपभोगेन. What do you understand by कृष्णवर्त्मा and why is it so called ?

LESSON 40.

1. अष्टौ गुणाः पुरुषं दीपयन्ति, प्रज्ञा च कौल्यञ्च दमः श्रुतञ्च ।
पराक्रमश्चाबहुभाषिता च, दानं यथाशक्ति कृतज्ञता च ॥

2. विपदि धैर्यमथाभ्युदये क्षमा, सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

3. नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुञ्चन्ति नराः पण्डितबुद्धयः ॥

Digitized by Google

4. अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥

EXERCISE 6.

Sl. 1. Explain दमः and श्रुतम्. Can you combine अष्टौ गुणाः into a compound word ?

Sl. 2. इदं refers to धैर्य्यं, क्षमा, वाक् पटुता, विक्रमः, अभिरुचिः and व्यसनम्. How is it, then, that it has been treated as a singular (rather than as a plural) as well as a neuter (rather than as a masculine or a feminine) ?

Explain व्यसनं श्रुतौ. Do you know any other meaning of the word व्यसनम् ? What the force of हि ?

LESSON 41.

यो लोभात् कुरुते कर्म्म नैवोदर्कमवेक्षते ।
विड़म्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥

कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म । तस्य पुत्त्रा वानरक्रीड़ासक्ता वानरयूथं नित्यमेव भोजनविशेषैः पुष्टिं नयन्ति स्म । वानरयूथपश्च नीतिशास्त्रमतवित्तदनुष्ठाता* च तान् सर्व्वानध्यापयति स्म । अथ तस्मिन् राजगृहे कुमारवाहनयोग्यं मेषयूथमासीत् । तन्मध्यादेको जिह्वालोलादहर्निशं

*उक्तञ्च—शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान् सुचिन्तितञ्चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥

Digitized by Google

महानसे प्रविश्य यत् किञ्चिदपश्यत् तत् सर्व्वमभक्षयत्। ते च सूपकारा यत् किञ्चिदग्रे पश्यन्ति स्म तेन तं ताड़यन्ति स्म। सोऽपि वानरयूथपस्तद्दृष्ट्वा व्यचिन्तयदहो मेषसूपकारकलहोऽयं वानराणां क्षयाय भविष्यति। यतोऽस्वास्वादलोलुपोऽयं मेषः, महाकोपाश्च सूपकारा यथासन्नवस्तुना प्रहरन्ति। तद्यदि वस्त्वन्तराभावात् कदाचिदुल्मुकेन ताड़यन्ति तदूर्णाप्रचुरोऽयं मेषः स्वल्पेनापि वह्निना प्रज्वलिष्यति। दह्यमानः पुनरस्मत्कुट्यां समीपवर्त्तिन्यां प्रवेक्ष्यति। सापि तृणप्राचुर्य्याज्ज्वलिष्यति। ततोऽस्मा वह्निदाहमवाप्स्यन्ति। श्रूयते च वानरवसया अस्मानां वह्निदाहदोषः प्रशाम्यति। तद् भद्रमिदं न पश्यामि। एवं निश्चित्य सर्व्वान् वानरानाहूय रहसि प्रोवाच—

मेषेण सूपकाराणां कलहो योऽत्र वर्त्तते।
स भविष्यत्यसन्दिग्धं वानराणां क्षयावहः॥

किञ्च—सदैव कलहो यत्र गृहे नित्यमकारणम्।
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥

तदेतद्राजगृहं परित्यज्य वनं गच्छामः।

Digitized by Google

अथ तत् तस्य वचनमश्रद्धेयं मत्वा मदोद्धता वानरा प्रहस्य प्रोचुः, भो ब्रह्मभावाद् भवतो बुद्धि-वैकल्यं सञ्जातं, येनैतद् ब्रवीषि। उक्तञ्च

वदनं दशनैर्हीनं लाला स्रवति नित्यशः।
न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः॥

न वयं राजपुत्रैः स्वहस्तप्रदत्तान् अमृतोपमान् भक्ष्यविशेषान् परित्यज्य भटव्यां कषायकटुतिक्तास्वा-स्वादानि वनफलानि भक्षयिष्यामः। तच्छ्रुत्वा अश्रु-कलुषदृष्टिः यूथपः प्रोवाच, रे रे मूर्खाः यूयमेतत्-सुखस्य परिणामं न जानीथ। साम्प्रतमेव मधुरमेतत् परिणामे विषवद् भविष्यति। तदहं कुलक्षयं स्वयं नावलोकयिष्यामि अधुनैव वनं यास्यामि।*

एवमभिधाय सर्व्वांस्तान् परित्यज्य स यूथपोऽटव्यां गतः। अथ तस्मिन् गतेऽन्यस्मिन् अहनि स मेषो महानसे प्रविष्टः। यावदेनं ताड़यितुं सूपकारेण नान्यत् किञ्चित् समासादितं तावदर्द्धज्वलितकाष्ठेनासौ

---

* उक्तञ्च—अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे।
मनस्विनी दरिद्रस्य वनादन्यत् कुतः सुखम्॥

Digitized by Google

ताड़ितः। ततस्तार्द्दज्वलितशरीरः शब्दायमानः प्रत्यासन्नवर्त्तिन्यां अग्निकुण्यां प्रविष्टः। तत्र च तत्प्राचुर्य्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्व्वत्रापि वह्निज्वालास्तथा समुत्थिताः यथा कुण्यां बद्धाः केचिदग्नाः स्फुटितलोचनाः पञ्चत्वं गताः, केचिद् बन्धनानि त्रोटयित्वा अर्द्धदग्धशरीरा क्रोशायमाणा इतस्ततश्च धावमानाः सर्व्वमपि जनमाकुलीचक्रुः। अत्रान्तरे राजा सविषादः वैद्यानाहूय प्रोवाच भो भोः प्रोच्यतामेषामग्नानां कश्चिद्दाहोपशमनोपायः। तेऽपि सञ्चिन्त्य शास्त्राणि प्रोचुः, देव श्रूयताम्।

कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अग्नानां नाशमभ्येति तमः सूर्य्योदये यथा॥

तदाकर्ण्य राजा समस्तवानरवधमादिष्टवान्। सर्व्वे च ते वानराः व्यापादिताः।*

अथ सोऽपि वानरयूथपस्तं कुलसंक्षयं परिज्ञाय परं विषादमुपगतः त्यक्ताहारनिद्रः वनाद् वनं पर्य्यटन्

---

* उक्तञ्च—सुहृदां हितकामानां यः श्रृणोति न भाषितम्।
विपत् सन्निहिता तस्य स नरः शतुनन्दनः॥

Digitized by Google

कुत्रचित् पद्मिनीषण्डमण्डितं सरः समासादितवान्। तद् यावन्निपुणतयावलोकयति तावत् वनचरमनुष्याणां प्रविशदेव पदं पश्यति स्म न तु निर्गच्छत्। ततश्चिन्तितं नूनमत्रान्तर्जले दुष्टग्राहेण भाव्यम्। तत् पद्मिनीनालमादाय दूरस्थ एव जलं पिबामि। तथा कृते रत्नमालाविभूषितकण्ठो राक्षसः सरसो निष्क्रम्य तमुवाच भो योऽत्र सलिले प्रविशति स मे-भक्ष्यः। तत्रास्ति धूर्त्ततरस्त्वदन्यो यः पानीयमनेन विधिना पिबति। तत्तुष्टोऽहं, प्रार्थयस्व हृदयवाञ्छि-तम्। कपिराह भोः कियती ते भक्षणशक्तिः। स आह शतसहस्रायुतलक्षाणि अपि जलप्रविष्टानि भक्षयामि। वाक्षतः शृगालोऽपि मां धर्षयति। वानर आह अस्ति मे भूपतिना सहात्यन्तं वैरम्। तद् यद्येनां रत्नमालां मे प्रयच्छसि तदा सपरिवारमपि तं वाक्प्रपञ्चेन लोभयित्वा अत्र सरसि प्रवेशयामि।

अथ राक्षसः श्रद्धेयं वचस्तस्य श्रुत्वा रत्नमालां दत्त्वाह भो मित्र यत् समुचितं स्यात् तत् क्रियता-मिति। वानरोऽपि रत्नमालाविभूषितकण्ठस्त-त्रगरमासाद्य हृद्यप्रासादेषु परिभ्रमन् जनैर्दृष्टः पृष्टश्च

Digitized by Google

भो यूथप क्व भवान् द्रयन्तं कालं स्थितः ? कुतस्त्येदृक् रत्नमाला लब्धा या दीप्त्या सूर्यमपि तिरस्करोति ?

वानर आह अस्ति कुत्रचिदरण्ये धनदनिर्मितं गुप्ततरं सरः। तत्र सूर्येऽर्वोदिते रविवारे यः कश्चिन्निमज्जति स धनदप्रसादाद् ईदृशरत्नमालाविभूषितकण्ठो निष्क्रामति। अथ भूभुजा तदाकर्ण्य जनात् स वानरः समाहूतः पृष्टश्च भो यूथाधिप किं सत्यमेतत् ? रत्नमालासनाथं सरोऽस्ति क्वापि ? कपिराह स्वामिन् एष प्रत्यक्षया मत्-कण्ठस्थितया रत्नमालया प्रत्ययस्ते। यदि तवापि रत्नमालाभिः प्रयोजनं तन्मया सह कमपि प्रेषय येन तच्चित्रं दर्शयामि। तत् श्रुत्वा नृपतिराह यद्येवं तदहं सपरिजनः स्वयं गमिष्यामि यथा मे प्रभूता रत्नमालाः सम्पत्स्यन्ते। वानर आह स्वामिन् यथारुचि क्रियताम्।

अथ भूपतिः रत्नमालालोभेन शिविकारूढः वानरसहितः सपरिजनः प्रस्थितः। उक्तञ्च—

तृष्णे देवि नमस्तुभ्यं यया वित्तान्विता अपि।
अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि॥

Digitized by Google

